A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# वैदिकपरम्परायां शाब्दबोधविमर्श

एस् प्रभुलिङ्गदेवरु

*कूटशब्दाः*

**वेदः** = 'विद ज्ञाने' ज्ञानराशिः। ऋक्, यजुः, सामः, अथर्व इति चत्वार वेदाः।

**वेदान्तः** = ब्राह्मणः, आरण्यकम्, संहिता, उपनिषत् इति वेदस्य चतुर्षु भागेषु अन्तिमः भागः वेदान्तः। स च उपनिषत्।

**शाब्दबोधः** = शब्दात् जायमानः बोधः शाब्दबोधः।

**ओंकारः** = अ + उ + म्-इति वर्णानां समवायः। बीजमन्त्रः।

**महावाक्यम्** = एकैकस्य वेदस्य सारभूतं वाक्यम्। प्रज्ञानं ब्रह्म, तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म इति चत्वारि महावाक्यानि।

**षडङ्गानि** = वेदानाम् षट् अङ्गानि। तानि च शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्, कल्पम् इति।

**इन्द्रशत्रुः** = १. इन्द्रः शत्रुः = शातयिता यस्य सः = वृत्रः।

२. इन्द्रस्य शत्रुः = शातयिता = इन्द्रसंहारकः।

**पञ्चाङ्गम्** = पञ्चानाम् अङ्गानाम् समाहारः।

वारः, तिथिः, नक्षत्रम्, योगः, करणम्-इति ज्योतिषशास्त्रस्य पञ्च अङ्गानि।

**षड्दर्शनानि** = दृशिर्दर्शने। सत्यसाक्षात्कारकसाहित्यं दर्शनम्।

तच्च आस्तिकदर्शनम्, नास्तिकदर्शनम्, इति द्विधा। पूर्वमीमांसा, सांख्यम्, योगः, न्यायः, वैशेषिकम् इति षट् आस्तिकदर्शनानि।

***शब्दजन्यबोधविषये मतभेदोऽस्ति नैयायिकानाम्, मीमांसकानाम्, वैयाकरणानाञ्च मते। अत्र व्याकरणशास्त्रमाश्रित्य शाब्दबोधः प्रदर्शितः। तत्र आदौ ओंकारविषयकशाब्दबोधं दर्शयित्वा अग्निना रयिमश्नवत् इति ऋग्वेदीयमन्त्रस्य शाब्दबोधः उपदर्शितः। तदनु तत्त्वमस्यादिषु तुतुर्ष वैदिकमहावाक्येषु वेदान्तदर्शनमवलम्ब्य शाब्दबोधसरणिः उपदर्शिता। विशेषतस्तत्र जहदजहल्लक्षणावृत्तिः उल्लिखिता। एवं वैदिकवाक्येषु शाब्दबोधं निरूपयित्वा***

ISSN 976-8645

***वेदाङ्गभूतेषु शिक्षादिषु शाब्दबोधस्वरूपम् उपपादितम्। अन्ते वेदवेदाङ्गान्युपलभ्य प्रवृत्तेषु आस्तिकेषु षड्दर्शनेषु शाब्दबोधक्रमः उपपादितः।***

वेदवेदाङ्गदर्शनेभ्यः उद्धृतेषु केषुचिद्वाक्येषु शाब्दबोधप्रकारः कथमिति किञ्चत् प्रदर्श्यते। आदौ वेदमन्त्रेषु शाब्दबोध निरूप्यते। तत्र सर्वत्रापि मन्त्रेषु ओंकारः उपयुज्यते। अतः सर्वप्रथमम् ओंकारस्य शाब्दबोधः प्रदर्श्यते।

भारतीयदर्शनपरम्परायां ओंकारस्य स्थानमतिमहत्तमं विद्यते। अस्य च ओंकारस्य प्रणवः इत्यपरं नामधेयम्। परब्रह्म, प्रारम्भः, मङ्गलम्, उपक्रमः, अङ्गीकारः इत्यादयोस्य विविधाः अर्थाः। अकारोकारमकारवर्णात्मक एवायमोङ्कारः। एते त्रयः वर्णाः ब्रह्मविष्णुमहेश्वरप्रतीकाः तद्वाचकाश्च इत्युच्यन्ते।

**अकारो विष्णुरुद्दिष्टः उकारस्तु महेश्वरः।**
**मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः।।**–महानिर्वाणतन्त्रम्।

किञ्च अत्रत्यमेकैकमप्यक्षरम् एकैकस्मात् वेदात् उद्धृतमित्यतः अयम् ओंकारः ऋग्यजुस्साम्नां त्रयाणां वेदानां प्रतीकः इत्युच्यते।

**अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः।**
**वेदत्रयान्निरदुहत् भूर्भुवःस्वरिति त्रिधा।।** –मनुस्मृतिः २.७६

तद्यथा–'अग्निमीळे पुरोहितम्' इति ऋग्वेदस्य आदिममन्त्रः। इतः अकारः स्वीकृतः। 'बन्धु' इति यजुर्वेदस्य अन्तिम शब्दः। ततः उकारः स्वीकृतः। 'साम' इति पदात् मकारः स्वीकृतः इति।

'ओंकार एव सर्वा वाक्' इत्युच्यते श्रुत्या। ओंकारस्य परब्रह्मवाचकत्वं प्रतिपादयति श्रुतिरेषा ''सर्वे वेदाः यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओंमित्येतत्''।। (कठोपनिषत्) इति।

ओंकारस्य परब्रह्मवाचकत्वादस्य सर्वात्मकत्वं प्रतिपादितम् उपनिषत्सु। तद्यथा–इह यत् परब्रह्म अपरब्रह्म इति यद्वर्तते तदोंकारः एव (एतद्वैसत्यकामा परञ्चापरञ्च ब्रह्म यदोङ्कारः।–प्रश्नोपनिषत् ५.२)। जगतीतले भूतं भविष्यत् वर्तमानञ्च इत्येतत् यदस्ति तत्सर्वमोंकारः एव (ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानभूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव।।–माण्डूक्योपनिषत्)। त्रिकालातीतश्च इतोऽप्यन्यत् यदस्ति तदप्योंकार एव। एवमयमोंकारस्य

पवित्रतमत्वात् सर्वत्र मङ्गलकार्येषूपयुज्यते आदावेव। तत्र विशषतः वेदारम्भे अन्ते च 'ओं' इत्युचार्यते। पञ्चाक्षर्यादिषु सर्वेष्वपि मन्त्रेषु अयं बीजाक्षरत्वेन प्रयुज्यते।

एतादृशोऽयमोंकारः न सुबन्तम्। नापि तिङन्तम्। किन्तु केवलं वर्णसमुदायः, सङ्केतात्मकः। अत एवात्र न भावनामुख्यविशेष्यकशाब्दबोधः नापि प्रथमान्तार्थमुख्यविशेषकः शाब्दबोधः न वा धात्वर्थमुख्यवेशेष्यकः शाब्दबोधः। किन्तु 'ओमित्येकाक्षरं ब्रह्म' (भगवद्गीता ८.१३) इत्यादिविवरणवाक्यात् शाब्दबोधः। एवञ्चात्र शक्तिग्राहकप्रमाणं, ''वाक्यस्य शेषात् विवृतेर्वदन्ति'' इत्युक्तदिशा विवरणमेवेति मन्तव्यम्। ततश्च गौः इत्युक्ते यथा 'अयं गौः' इति बोधो जायते, तथैव इह 'ओम्' इत्युक्ते', 'भूतभविष्यद्वर्तमानात्मक-सच्चिदानन्दात्मकं ब्रह्मेदं सर्वम्' इति बोधो भवति। एवञ्च ओंकारोपासनद्वारा परब्रह्मसाक्षात्कारद्वारा मोक्षफलमवाप्नोति साधकः।

**वेदान्तवाक्येषु शाब्दबोधः**

संहिता ब्राह्मणमारण्यकमुपनिषदिति वेदस्य चत्वारो विभागाः। तत्र उपनिषत् अन्तिमो भागः इत्यतः वेदान्तशब्देन व्यपदिश्यते। जीवेश्वरजगदिति तत्त्वानामभेदप्रतिपादनमेव सर्वेषामपि वेदान्तानां निर्णयः। समस्तेषु वेदान्तेषु चत्वारि वाक्यानि महावाक्यत्वेनाङ्गीकृतानि शास्त्रज्ञैः। तानि च, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म इति। एषां चतुर्णामपि वाक्यानाम् अखण्डैकरसब्रह्मस्वरूपप्रनिपाद एव तात्पर्यम्। तथापि एकैकमपि वाक्यं एकैकस्य वेदस्य प्रतिनिधिभूतम्। अत एव चत्वारि महावाक्यानीत्यङ्गीकृतानि।

**प्रज्ञानं ब्रह्म (ऋग्वेदः, बृहदारण्यकोपनिषत्)**

प्रज्ञानमिति-'प्र' इत्युपसर्गपूर्वक ज्ञा-धातोः भावे ल्युडन्ते रूपम्। 'ब्रह्म' इति तु 'बृह्' धातोः मनिन् प्रत्ययान्तं रूपम्। उपसर्गाणां द्योतकत्वम्अनः। प्रज्ञानं ब्रह्म इत्युभयोरभेदेनान्वयः। अतः एकत्वसंख्याविशिष्टं प्रज्ञानाभिन्नं ब्रह्म इति बोधः। वैयाकरणनये सर्वत्र 'अस्ति' इति क्रिया अध्याहार्या। ततश्च एकत्वसंख्याविशिष्टप्रज्ञानाभिन्नब्रह्मकर्तृक-वर्तमानकालिक-भवनानुकूलव्यापारः इति शाब्दबोधः।

**अहं ब्रह्मास्मि (यजुर्वेदः तैत्तिरीयोपनिषत्),** तत्त्वमसि, अयमात्मा ब्रह्म इत्येतेषु त्रिषु महावाक्येषु एकया वृन्त्या शाब्दबोधः उदेति। तद्यथा-अहं ब्रह्मास्मि इत्यत्र, अस्मत् पदवाच्यः अहं पदप्रतीतिविषयः चैत्रादिः, ब्रह्मपदवाच्यः सृष्टिकर्ता चतुर्मुखो ब्रह्मा। अस्मीत्यस् धातुस्तु एतयोरुभयोः

ISSN 976-8645

अभेदवाचकं पदम्। तत्र लोके चैत्रादि: न कथञ्चित् ब्रह्मा भवितुमर्हति। यदि 'ब्रह्म' पदस्य सच्चिदानन्दात्मकं परब्रह्म इत्येवार्थ: स्वीक्रियते, तथापि, अल्पज्ञत्वाल्पशक्तित्वादि विशिष्टस्य चैत्रादे: सर्वज्ञत्वसर्वशक्तित्वादिविशिष्टात् प्रब्रह्मण: भेदत्वात् चैत्रादि: नैव ब्रह्म भवति। एवञ्चात्र शक्यार्थस्वीकारे अन्वयाद्यनुपपत्ति:। किञ्चात्र वक्तु: श्रुते: जीवात्मपरमात्मनो: अभेदप्रतिपादने तताप्र्यं न तु चैत्रब्रह्मणो:। शक्यार्थस्वीकारे त्वत्र तात्पर्यानुपपत्ति:। अत एवात्र लक्षार्थ: स्वीक्रियते। स च लक्षार्थ: न शक्यार्थपरित्यागपूर्वकम् अपि तु शक्यार्थस्वीकृतिपूर्वकम्। यथा–अहं ब्रह्म अस्मि इत्यत्र अस्मत् पदेन अस्मत् पदवाच्यम् उपाधिगतम्, अल्पज्ञत्वाल्पशक्तित्वादिकं त्यज्यते किन्तु तद्गतं जीवात्मरूपं चैतन्यं गृह्यते। ब्रह्म इत्यत्र ब्रह्मपदेन ब्रह्मपदवाच्यमुपाधिगतं, सर्वज्ञत्वसर्वशक्तित्वादिकं त्यज्यते तद्गतम्, सच्चिदानन्दात्मकं चैतन्यमात्रं गृह्यते। इयमेव 'भागत्यागलक्षणा' 'जहदजहल्लक्षणा' इत्युच्यते। ततश्च जीवात्मपरमात्मनो: सच्चिदानन्दलक्षकत्वात् तयोरभेदप्रतिपादनं युज्यते अस्मीति क्रियापदेन। एवञ्च सच्चिदानन्दात्मकपरब्रह्माभिन्नमत्कर्तृक–वर्तमानकालिकभवनानुकूल–व्यापार: इति शाब्दबोध:।

**'तत्त्वमसि' ( सामवेद:, छान्दोग्योपनिषत् )** इत्यत्राप्येवं। तथा हि–'तत् त्वम् असि' इति पदच्छेद:। तदिति सर्वनाम। सर्वञ्च ब्रह्म। 'त्वम्' इति युष्मत् पदावाच्य: मैत्रादि:। 'असि' इति तयोरभेदप्रतिपादकं क्रियापदम्। मैत्रादे: ब्रह्माभिन्नत्वं सुतरामशक्यं लोके। वक्तु: तात्पर्यञ्चापि तन्न। एवञ्च वक्तु: तात्पर्याद्यनुपपत्तिकारणत: लक्ष्यार्थोत्र गृह्यते। पूर्ववदत्रापि जहदजहल्लक्षणा। ततश्च युष्मत्पदलक्ष्यजीवात्मतत्पदवाच्यपरमात्मनो: अभेद: फलित:। शाब्दबोधप्रकारस्तु ''सच्चिदानदात्म–कपरब्रह्माभिन्नयुष्मदभिन्न–जीवात्मकर्तृक–वर्तमानकालीन–भवनानुकूल–व्यापार:'' इति।

**'अयमात्मा ब्रह्म' ( अथर्ववेद:, माण्डूक्योपनिषत् )** इत्यत्र अस्तीति पदमध्याहार्यम्। अयम् आत्मा ब्रह्म अस्ति इत्यन्वय:। अयमिति इदं शब्दस्य पुल्लिङ्गप्रथमैकवचनरूपम्। अतोऽयमित्यनेन पुरोवर्तिद्रव्यमित्यर्थ: स्वीक्रियते।

**इदमस्तु सन्निकृष्टं समीपतरवर्तिचैतदोरूपम्।**

**अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्।।**

तच्च आत्मा। पुरोवर्ति द्रव्यं नाम देवदत्ताद्यात्मकम्। तच्च न आत्मा। आत्मा हि चैतन्यं जरामरणरहितम्। देवदत्तादिकञ्च द्रव्यं जरामरणसहितमित्यत: तन्नैव आत्मा भवितुमर्हति। वक्तु: श्रुतेरपि नायमाशय:। एवञ्चात्र तात्पर्याद्यनुपपत्ति:। अत एवात्र लक्ष्यार्थ: स्वीक्रियते। 'अयम्' इत्यस्य, इदं पदबोध्यदेवदत्तादिगतं चैतन्यमित्यर्थ:। ततश्च चैतन्याभिन्न: आत्मा जीवात्मा इति अयमात्मा

ISSN 976-8645

इत्यस्यार्थ:। 'अयमात्मा ब्रह्म' इत्यत्र जीवात्मपरमात्मनोरभेदप्रतिपादने तात्पर्यम्। किन्तु अल्पज्ञत्वाल्पशक्तित्वादिविशिष्ट: जीवात्मा, सर्वज्ञत्बसर्वशक्तित्वादिविशिष्ट: परमात्मा न भवति। एवं सति कथमेतयोरभेद: इति चेदुच्यते। अत्रापि वक्तु: तात्पर्यानुपपत्ते: जहदजहल्लक्षणा ग्राह्या इति। तथा च जीवात्मगतमौपाधिकं अल्पज्ञत्वाल्पशक्तित्वादिकं त्यज्यते। ब्रह्मगतञ्चौपाधिकं सर्वज्ञत्वसर्वशक्तित्वादिकञ्चापि हीयते। ततश्च तदुभयगतं चैतन्यमात्रं गृह्यते इति तयोरभेद:। इत्थञ्च सच्चिदानन्दात्मकब्रह्माभिन्न-इदम्पदबोध्यजीवात्मगतचैतन्यकर्तृक-वर्तमानकालिक-भवनानुकूलव्यापार: इति शाब्दबोध:।

**षडङ्गेषु शाब्दबोध:।**

शिक्षा, व्याकरणम्, छन्द:, निरुक्तम्, ज्यौतिषम्, कल्प: इत्येते षट्, वेदस्य अङ्गानीति मनीषिणामभिप्राय:।

**शिक्षाव्याकरणं छन्द: निरुक्तं ज्योतिषं तथा।**
**कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिण:।। -अमरकोष:** १.१८२.८३

वेदमन्त्राणां स्वरसहितोच्चारणक्रमविधायकमङ्गं शिक्षा इत्युच्यते। अत एव ऋग्वेदभाष्यभूमिकायां सायणाचार्थैरेवमभिभाषितम् ''स्वरवर्णादुच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा'' इति। वेदमन्त्रेषु स्वरव्यत्ययेन अर्थव्यत्योऽपि भवति।

तद्यथा-

**मन्त्रो हीन: स्वरतो वर्णतो वा मिथ्याप्रयुक्त: न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रु: स्वरतोऽपराधात्।।** इति।

इन्द्रस्य संहारं कामयता वृत्रासुरेण इन्द्रस्याभिचारयाग: आरब्ध:। तत्र इन्द्रस्य शातयिता संहारकर्ता पुत्रो मे जायतामित्याशयेन 'इन्द्रशत्रु: वर्धस्व' इति मन्त्र: ऊहित:। तत्र इन्द्रशत्रुपदस्य इन्द्रस्य शत्रु: इति तत्पुरुषसमास: इष्ट:। एतदर्थं तत्र अन्तोदात्त: प्रयोक्तव्य:। किन्तु ऋत्विजा आद्युदात्तस्वर: प्रयुक्त:। ततश्च बहुव्रीहिसमासतया पर्यवसन्नं तद्रूपं अर्थान्तराभिधायकं संवृत्तं।

तत: ''यस्य (मे) इन्द्र शत्रु: शातयिता स: (वृत्र:) (त्वं) वर्धस्व'' इत्यर्थाभिधानात् इन्द्र: एव वृत्रस्य शातयिता सम्पन्न:। एवञ्च इन्द्रशत्रु: इत्यत्र आद्युदातत्वे एकरीत्या बोध: अन्तोदात्तवे अन्यथा बोध: इति स्वरवर्णोच्चारणक्रमविधायकम् शिक्षाशास्त्रं भवत्यवश्यं शाब्दोबधनियामकम्।

ISSN 976-8645

वर्णव्यत्योच्चारणे शाब्दबोधव्यत्ययो यथा-सकल: इत्युच्चारिते 'सर्व:' इति शाब्दबोध: शकल: इति वर्णव्यत्ययेनोच्चारिते सति, 'शिला' इति बोध:।

**छन्द:-**

छन्द: इति वेदस्य अपरं नामधेयम्। अत एव तत्र वेदे वैकल्पिकप्रक्रियानिरूपणवेलायां पाणिनिना 'वा छन्दसि' (अष्टाध्यायी ३.४.८८) इत्येवं सूत्राणि विरच्यन्ते। किन्त्वत्र वेदाङ्गभूतं छन्द: न वेद:। अपि तु पद्यरचनासम्बद्धनियमविशिष्टं शास्त्रम्। 'यदक्षरपरिमाणं छन्द:' इति तस्य लक्षणम्। एवञ्च वेदमन्त्राणां गण:, मात्रा, वृत्तमित्यादिविषया: यत्र प्रतिपाद्यन्ते तच्छास्त्रं छन्दश्शास्त्रमित्युच्यते। वेदमन्त्राणां छन्दोबद्धत्वात् वेदानां छन्द: इति व्यवहार:। ततश्च छन्दोबद्धानां वेदमन्त्राणां शाब्दबोध: तत्तन्मन्त्राधीन:।

**निरुक्तरीत्या शाब्दबोध:-**

यास्काचार्यै: विरचितं निरुक्तमिदं 'निघण्टु:' इति पदेन व्यवह्रियते। चतुर्दशभि: अध्यायै: संवलितेऽत्र नामाख्यातोपसर्गनिपाता: इति चतुर्धा पदजातानि विभक्तानि। वेदशब्दानां व्युत्पत्तितदर्थविवरणमेवास्य वैशिष्ट्यम्।

'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति शाब्दबोधविषये निरुक्तसिद्धान्त:। ततश्च '**पाचक:**' इत्यस्य एकत्वसंख्याविशिष्ट-विक्लित्त्यनुकूलव्यापाराश्रय: कर्ता इति सत्त्वरूपद्रव्य-मुख्यविशेष्यक: शाब्दबोध:। '**चैत्र पचति**' इत्यत्र एकत्वसंख्याविशिष्ट-चैत्राभिन्नकर्तृक-विक्लित्त्यनुकूल-वर्तमानकालिक: व्यापार:' इति शाब्दबोध:।

**ज्यौतिषशास्त्रे शाब्दबोध:।**

ज्यौतिषशास्त्रं मानवानां नित्योपकारकं शास्त्रम्। कालानुगुणमनुष्ठीयमानानां कर्मणामिह विधानात् शास्त्रमिदं कालविधानशास्त्रमिति व्यपदिश्यते। भूमे: ग्रहाणाञ्च सङ्क्रमणमाश्रित्य धार्मिकादिव्यवहाराणामुपयुक्तं वर्ष-अयन-ऋतु-मास-पक्ष-वार-नक्षत्र-तिथि-योग-करणरूपात्मकं कालं निश्चिनोति शास्त्रमिदम्। अस्यैव शास्त्रस्य सार: 'पञ्चाङ्गम्' इति व्यवह्रियते।

तत्र "**वसन्ते वसन्ते ज्योतिषा यजेत**" इति काश्चिद्विधि:। अत्र 'वसन्ते' इत्यस्य वसन्तकाले इत्यर्थ:। स च काल: क: कीदृशश्च इति निरूपयति ज्यौतिषशास्त्रम्। यद्यस्य वसन्तकालस्य परिचय: एव न भवति तर्हि, 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यनेन विधिना शाब्दबोध: एव न जायते। ततश्च

ISSN 976-8645

''वसन्ते वसन्ते प्रतिवसन्तम्, यशस्कामकर्तृकज्योतिसाधनत्वेन, विधिविषयीभूतयागानुकूला भावना'' इति शाब्दबोधः।

**कल्परीत्या शाब्दबोधः।**

वेदोक्तकर्मणां क्रमप्रकारेण व्यवस्थापकं शास्त्रं कल्पशास्त्रम्। अस्य च शास्त्रस्य सूत्राणि विभक्तानि चतुर्धा। तद्यथा–श्रौतसूत्राणि, धर्मसूत्राणि, गृह्यसूत्राणि, शुल्बसूत्राणि च इति। तत्र धर्मसूत्राणि आपस्तम्बधर्मसूत्राणि, गौतमधर्मसूत्राणि, बोधायनधर्मसूत्राणि, वशिष्ठधर्मसूत्राणि, विष्णुधर्मसूत्राणि इत्यादिभेदेन अनेकधा।

कृष्णयजुर्वेदीय–तैत्तिरीयशाखीय–आपस्तम्बधर्मसूत्रेषु इदमेकं सूत्रम्–''नेमं लौकिकमर्थं पुरस्कृत्य धर्मांश्चरेत्'' इति। 'इमं लौकिकमर्थं पुरस्कृत्य धर्मान् न चरेत् इति अस्य सूत्रस्यार्थः। 'नञः पर्युदासार्थाङ्गीकारात् अस्य सूत्रस्य अभिप्रेतशाब्दबोधस्तु–लौकिकप्रयोजनभिन्नम् आत्यन्तिकधेयभूतमात्मसाक्षात्कारं प्रयोजनं पुरस्कृत्य धर्मान् चरेत्'' इति।

**षड्दर्शनेषु शाब्दबोधः।**

जीवेश्वरजगदिति सनातनतत्त्वानां चिन्तनं परामर्शश्च यत्र विधीयते तत् साहित्यम् दर्शनमित्युच्यते। इह भारते विरचितानि बहुविधानि दर्शनानि। तेषु वेदान् पुरस्कृत्य प्रस्थितानि दर्शनानि आस्तिकदर्शनानि इति परिगणितानि। इतराणि च नास्तिकदर्शनानीति विभक्तानि। तत्र पूर्वमीमांसा, उत्तरमीमांसा, न्यायः, वैशेषिकम्, सांख्यम्, योगः इत्येतानि षट् आस्तिकदर्शनानि।

पूर्वमीमांसकानां मते ''प्रतितिष्ठन्ति हवा य एता रात्रीरूपयन्ति'' इत्यत्र शाब्दबोधप्रकारः प्रदर्श्यते। (भाट्टभास्करः इति प्रस्तावनायां डॉ. कमलनयनशर्मा) रात्रिसत्रयागप्रसङ्गे दृश्येऽयमर्थवादः। यत्र विधिवाक्ये फलं न श्रूयते, परन्तु अर्थवादे श्रूयते, तत्र अर्थवादप्रतिपादितमेव फलं तस्य यागस्य भवतीति मीमांसाकानां सिद्धान्तः। अत्र विधौ फलं न श्रुतं। अर्थवादवाक्ये च प्रतिष्ठारूपं फलं श्रूयते। तस्मात् अर्थवादवाक्यपरिपठितमेव फलं विधेरपि भवतीति कल्प्यते। यद्यप्यर्थवादानां स्वार्थे न भवति प्रामाण्यम् अपि तु विधिवाक्येन सह एकवाक्यतया भवति प्रामाण्यम्, तथाप्यत्र स्तुत्यर्थमुपस्थितस्य वाक्यस्य प्रतिष्ठारूपं फलं भावनया आक्षिप्यते। विधिवाक्ये च प्रतिष्ठाकामपदमध्याहृत्य भावनायां कुर्वन्त्यन्वयम्। मण्डनमिश्रमते' प्रतितिष्ठिन्ति' इत्यस्य पदस्य सन्नन्तत्त्वेन विपरिणामः। 'उपयन्ति' इत्यस्य च विधित्वेन विपरिणामः। यच्छब्दस्य एतच्छब्दस्य च व्यत्यासः। तस्मात् ''ये प्रतितिष्ठासन्ति त एता रात्रीरूपयेयुः'' इति बोधः। न्यायसुधाकृन्मते 'प्रतितिष्ठन्ति' इत्यस्य लृडन्तत्वेनापि विपरिणामः।

ISSN 976-8645

ततश्च 'ये प्रतितिष्ठास्यन्ति त एता रात्रीरुपयेयु:' इति बोध:। एवञ्च रात्रिसत्रस्य प्रतिष्ठारूपमेव फलं मन्तव्यमिति संक्षेपार्थ:।

उत्तरमीमांसा तु दर्शनं वेदान्तदर्शनमित्युच्यते। तत्र वेदान्तदर्शनमवलम्ब्य तत्त्वमसीत्यादिषु चतुर्षु वेदानां महावाक्येषु शाब्दबोधप्रकार: प्रदर्शित:।

न्यायवैशेषिकयोस्तु दर्शनयो: शाब्दबोधविषये अभिमतमेकमेव। प्रथमान्तार्थमुख्य-विशेष्यकशाब्दबोध: इति नैयायिकानां सिद्धान्त:।

आचर्य: कपिलमुनि: सांख्यदर्शनस्य प्रवर्तक:। संख्यापदस्य एकत्वादिकं संख्या, चर्चा, विचारणा इत्यादय: बहव: अर्था:। (**'संख्या चर्चा विचारणा' अमरकोष: १.१६३**) प्रकृति: पुरुष: इत्येवमत्र तत्त्वनि पञ्चविंशति: इति संख्यया परिगणितानि,तत्त्वञ्चात्र विमर्शितमित्यत: दर्शनमिदं सांख्यमित्युच्यते।

**मूलप्रकृतिरविकृतिर्महदाद्या: प्रकृतिविकृतय: सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृति: पुरुष:।।**

इति ईश्वरकृष्णेन विरचिता तृतीया सांख्यकारिका। प्रकृति: इति तत्त्वं मूलप्रकृति: इत्युच्यते। महत्, बुद्धि:, अहङ्कार:, रूपम्, रस:, गन्ध:, स्पर्श:, शब्द: इत्येतानि सप्त तत्त्वानि प्रकृतिविकृतितत्त्वानीत्युच्यन्ते। पञ्चज्ञानेन्द्रियाणि, (श्रोत्रम्, नेत्रम्, रसना, नासिका, घ्राणम्) पञ्चकर्मेन्द्रियाणि (वाक्, पाणि:, पाद:, गुद:, गुह्यम्), पञ्चभूतानि (आकाश:, वायु:, अग्नि:, जलम्, पृथिवी) मन: इत्येतानि षोडश तत्त्वानि विकृतितत्त्वानीत्युच्यन्ते। तत्र उपरितनकारिकागतस्य 'षोडशकस्तु' इति पदस्य ''षोडशसंख्यावच्छिन्नो गण: षोडशक: विकार: एव न प्रकृति:'' इति बोध:।

आचार्य: पतञ्जलि: योगदर्शनस्य प्रवर्त्तक:।'युजिर्योगे' इति धातुना निष्पन्नस्य योगशब्दस्य चित्तवृत्तिनिरोध: इत्यर्थ:। (**योगश्चित्तवृत्तिनिरोध:-योगसूत्रम् १.२**)

'अभावप्रत्ययालम्बननिद्रा' इति योगसूत्रस्य समाधिपादस्य दशमं सूत्रम्। अस्य च सूत्रार्थ: एवं निरूपित: भाष्यकारेण व्यासेन-''सा च निद्रा सम्प्रबोधे प्रत्यवमर्शात् प्रत्ययविशेष:'' इति। तच्च विशदीकृतम्-''सुखमहमस्वाप्सं प्रसन्नं मे मन: प्रज्ञां मे विशारदीकरोति, दु:खमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थिम्, गाढं मूढोऽहमस्वाप्सम्, गुरूणि मे गात्राणि क्लान्तं मे चित्तमलसं मुषितमिव

ISSN 976-8645

तिष्ठतीति। स खल्वयं प्रबुद्धस्य प्रत्यवमर्शः न स्यादसति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषयाः न स्युः। तस्मात् प्रत्ययविशेषः निद्रा। सा च समाधावितरप्रत्ययवत् निरोद्धव्या'' इति।

## सन्दर्भग्रन्थसूची


1. अष्टाध्यायीसूत्रपाठः-चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
2. आर्यसिद्धान्तः-आर्यभट्टकृतः चौखम्बासिरीज्, वाराणसी, १९८०।
3. उपनिषत्सङ्ग्रहः-मोतीलाल् बनारसीदास्, देहली-१९७०।
4. ऋग्वेदः-हिन्दीभाषान्तरसहितः, श्रुतिबोधकार्यालयः, मुम्बई।
5. निरुक्तम्-दुर्गाव्याख्यासहितं, मुम्बई-१९४२
6. न्यायदर्शनम्-वात्स्यायनभाष्ययुतम्, बौद्धभारती, वाराणसी, १९८४।
7. पातञ्जलयोगदर्शनम्-मोतीलाल बनारसीदास्, देहली, १९८७>
8. भाट्टभास्करः-राष्ट्रियसंस्कृतसंस्थानम्, देहली १९९६।
9. वैयाकरणभूषणसारः-प्रभासहितः, चौखम्बासंस्कृतसिरीज्, वाराणसी १९६९।
10. वैशेषिकदर्शनम्-भागः १. नवाह्निकम् चौखम्बा संस्कृतप्रतिष्ठानम् देहली १९९२।
11. शिक्षासूत्राणि-आपिशलि-पाणिनी-चन्द्रगोमिनिकृतानि, चौखम्बाविश्वभारती, वाराणसी।
12. साँख्यकारिका-ईश्वरकृष्णः, चौखम्बासंस्कृतसीरीज्, वाराणसी १९५३।